National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(63): 88-89
© 2025 NJHSR
www.sanskritarticle.com

**डॉ बुद्धिबल्लभदेवराड़ी**
सहायकाचार्यः (अ.) साहित्यविभागः,
श्री दीवानकृष्णकिशोर-सनातनधर्म -
आदर्शसंस्कृतकॉलेज, अम्बालाछावनी,
हरियाणा

**Correspondence:**
**डॉ बुद्धिबल्लभदेवराड़ी**
सहायकाचार्यः (अ.) साहित्यविभागः,
श्री दीवानकृष्णकिशोर-सनातनधर्म -
आदर्शसंस्कृतकॉलेज, अम्बालाछावनी,
हरियाणा

# "वर्तमानसन्दर्भे साहित्यस्य प्रासङ्गिकता"

**डॉ बुद्धिबल्लभदेवराड़ी**

अखिलविश्वकल्याणाय या कामना क्रियते चेत् तर्हि सा भाषा साहित्यरूपेण पल्लविता, पुष्पिता, विकसिता चाभवत्। संस्कृतवाङ्मये साहित्यशब्दस्य व्यापकार्थे प्रयोग: विहित:। अत: आदौ साहित्यशब्दस्य व्युत्पतिः तद्यथा -

सह+हित इत्यनयो:पदयो:भाववाचक: तद्धितप्रत्यये सति साहित्यशब्दो निष्पन्नो भवति। अस्यार्थो भवति हितेन सहितमिति साहित्यम् अर्थात् हित इति पदस्यार्थ: डुधाञ् धारणार्थकधातौ क्त प्रत्ययेन निष्पद्यते कथमिति दाधातोहि नियमेन धा" आदेशो भूत्वा हित शब्दो निष्पन्नो भवति अस्यार्थ: धारयति क्वचित् कार्यं अपितु धारणन्तु उचितानुचितं सर्वाणि कार्याणि भवन्ति अत एव हित शब्दो परोपकारार्थे रूढो अभवत् । यदि सह पदस्थ हितेन साकं समास:क्रियते चेत् तर्हि सहित शब्दो अभवत्।अनन्तरं सहितेति पदस्यार्थ: भवति हितेन सहितम् अपि च हितेन युक्तम् यत् प्रत्यय सति साहित्यशब्दो निष्पन्नो भवति। अस्यार्थ: जगत्कल्याणयुक्तं यत् तत् साहित्यम् अत:समाजकल्याणमेव साहित्यशब्दस्य प्रयोजनमस्ति।

भाषाया: समृद्धे:द्योतको विद्यते। कस्यापि राष्ट्रस्य साहित्यं तस्य राष्ट्रस्य सामाजिकार्थिकाध्यात्मिकञ्चेति परिस्थितिनां परिचायिका वर्तते। **रसगङ्गाधरे भूमिकायाम्** [1] -
शब्दार्थसम्बन्ध: साहित्यमिति । शब्दस्य चमत्कारविषये सर्वप्रथमं ऋग्वेदादेव प्रोक्तमस्ति--

**"उत्तत्व:पश्यन्न ददर्श वाचमुत: त्व: श्रृण्वन्न श्रृणोत्येनाम्।**
**उतो त्वस्मै तन्वं विसस्रे जायेवपत्यु: उशती सुवासा:।।**[2]

अर्थात् ये जना: शब्दानाम् अर्थं न जानन्ति ते वाणीं न ज्ञास्यन्ति। दृष्ट्वापि न ददर्श।श्रुत्वापि न श्रृणोति। ये शब्दज्ञा: सन्ति तेषां पुरत: शब्दा एव स्वकीयवपु: समर्पयति शब्दज्ञानां प्रति यथा कामिन्यामिव समर्पयति कामपुरूषाणां अत एव चमत्कारजन्यशब्दा एव साहित्यपदवाच्या:।वस्तुत: अमृतमिव साहित्यसमालोचना तद्यथा---

**संगीतमथसाहित्यं सरस्वत्या:स्तनद्वयम्।**
**एकमापातमधुरमन्यदालोचनामृतम्।।**[3]

संगीतं साहित्यञ्च ये द्वे सरस्वत्या: स्तनमस्ति। एकं मधुरामृतम् अपरञ्च आलोचनामृतमिति साहित्यशास्त्रीयग्रन्थेषु आचार्यादिभि: साहित्यविषये बहुधा व्यख्यानं कृतमस्ति परञ्च वक्रोक्ति-जीवितकारस्य व्याख्यानम् अतीव प्रासङ्गिकं वर्तते तद्यथा-----

**"साहित्यमनयो: शोभाशालितां प्रति काव्यसौ।**
**अन्यूनातिरिक्तत्वमनोहारिण्यवस्थिति:।।**[4]

साहित्यस्य कृत्ते क्रियाकल्प:, सौन्दर्यशास्त्रम्, अलङ्कारशास्त्रम्, काव्यशास्त्रम् चापरपर्यायशब्दा: व्याहृयन्ते।

भारतीयकाव्यशास्त्रे प्राचीनकालादारभ्य अद्यावधि पर्यन्त साहित्य-विषये सूक्ष्मातिसूक्ष्मचितनेन स्वमेधया व्याख्यानं, सर्जनं च विहितमस्ति। अत एव साहित्यस्य प्राचीनार्वाचीनकालयो: अतीव प्रासङ्गिकता दरिदृश्यते।यतोहि वैदिकसाहित्यं लौकिकसाहित्यञ्च सम्पूर्णसंस्कृतवाङ्मयस्य मार्गो अस्ति। संस्कृतवाङ्मये यत् किमपि ज्ञानराशि: विद्यते तत् सर्वमपि साहित्यरूपेण तिष्ठति अत एव साहित्यस्य एतत् व्यापकत्वमिति ,मानवजीवनस्य निधि: हृदयस्य च प्रवाह: समाजस्य प्रतिबिम्बदर्पण: साहित्यं सहृदयस्य हृदयाह्लादमयत्वमेव।यथोक्तम् ध्वन्यालोककारेण-----

**"सहृदयहृदयाह्लादमयत्मेव काव्यलक्षणम्।"**[5]

अर्थात् लोकोत्तरचमत्कारिततया सहृदयानां हृदयाकर्षि वाक्यं काव्यं साहित्यं चेति फलितम्।

यत् खलु विलक्षणचमत्कारितया
बलादिव वशमानीय समाजिकमनांसि रंजयति यथा-
अभिज्ञानशाकुन्तले------

**"मानसीभ्य: कथं नु स्यादस्य रूपस्य सम्भव:।**
**न प्रभातरलं ज्योतिरुदेति वसुधातलात्।।**[6]

अर्थात् यथा वसुधातलात् सूर्यचन्द्रमसोरुद्गमो न सम्भवति तथैव मानुषीभ्य: स्त्रीभ्यो विलक्षणरूपवत्या अस्या नोद्गम: प्रतिभाति। अत्र प्रतिवस्तूपमालङ्कार:। एवञ्च रसालङ्कारादिमयत्वेन सहृदया-वर्जकत्वेन चेदं वाक्यं काव्यपदेन व्यपदेष्टुशक्यमेव।

साहित्यस्य चमत्कार: महाकवे: भवभूति: उत्तररामचरितनाटके तद्यथा--

**"अयि कठोर! यश: किल ते प्रिय: किमयशो ननुघोरमत: परम्।**
**किमभवद् विपिने हरिणीदृश: कथय नाथ! कथं बत मन्यसे।।**[7]

दण्डकारण्याख्यं वनं प्रविष्टं रामं प्रति सीतापरित्यागमुद्दिशन्त्या। वनदेव्या वासन्त्या इयमुक्ति:

हे राम! प्रकृत्यनुरञ्जनाय पतिव्रताया: प्राणसमाया पत्न्या: सीताया परित्यागेन ते अभीष्टयशोरक्षणप्रयासो न कीर्तिकर: निर्दोषाया: प्रियाया निर्वासनात्ते अकीर्ते: परं न किमपि लब्धमिति। अत्रानुप्रासा-लङ्कार: स्पष्टमेव ।

संस्कृतस्य सम्पूर्णविषयाणां व्यापकत्वेन तेषां भाषाणां साहित्य-मेव अत एव व्याकरण-न्याय-मीमांसादि ग्रन्थसमूहाणां कृते आचार्यविल्हणेन विक्रमाङ्कदेवचरिते साहित्यशब्दस्य प्रयोग: इत्थं कृतम्--------------

**"साहित्य-पाथोनिधि-मन्थनोत्थं**
**काव्यमृतं रक्षत हे कवीन्द्रा:।**
**यत्तस्य दैत्या इव लुण्ठनाय**
**काव्यार्थचौरा: प्रगुणीभवन्ति।।**[8]

वस्तुत: साहित्यशब्दस्य प्रयोग: काव्यस्य कृते समुचितं वर्तते।काव्येष्वपि नाटकं रम्यमिति।काव्यानुशीलनेन न केवलं मनोरञ्जनं भवति अपितु धार्मिक-नैतिक-दार्शनिकश्चेति विशिष्टज्ञान-मपि सम्यक्तया भवितुमर्हति ।निष्कर्षरुपेण वक्तुं शक्यते यत् साहित्यस्य साम्प्रतमपि अत्यन्तं प्रासङ्गिकं वर्तते।कारणं यदन्येषां वस्तूनि परित्यज्य साहित्यमेव एतादृशी भावना वर्तते सा भावना मानवस्यान्त:करणस्य प्रवाहो विद्यते।तस्याः भावनाया:प्रवाहो मानवचिन्तनस्य शोधनमस्ति।यदि मानवचिन्तनशून्यो वर्तते तर्हि पशुसदृशो प्रतियते।अत:परिष्कृतभाषामेव साहित्यम्। न केवलं पदपूर्ति एव साहित्यम् अपितु साहित्य-शब्दार्थयो:चमत्कार।

वस्तुस्थिति: वर्तते स सहृदयाहृदये स्पन्दनं जनयति।एवञ्च समाजं प्रति एकरूपताया: समरसतायाश्च भावम् उद्पादयति तत् साहित्यम्। येन नूतनं स्पन्दनं भवति। सहितयोर्भाव: साहित्यम्।यत्र शब्दानुरूपो अर्थ: अर्थानुरूपो शब्दश्च तत् साहित्यम् अत: साहित्यस्य सनातनत्वेन व्यापकत्वेन च "वर्तमानसन्दर्भे अपि प्रासङ्गिकता वर्तते अत एव सर्वेषु कालेषु साहित्यस्य प्रासङ्गिकता भवत्येव इति फलितम्।

**सन्दर्भग्रन्थाः**

[1] रसगङ्गगाधरे भूमिकायाम् 8 पृष्टे
[2] ऋग्वेदे 10/716/4
[3] रसगङ्गाधरे भूमिकायाम् 9 पृष्टे
[4] वक्रोक्तिजीविते 1-17
[5] ध्वन्यालोके 1-1 पृष्टे 23
[6] अभिज्ञानशाकुन्तले 1-22
[7] उत्तररामचरितनाटके 3-27
[8] विक्रमाङ्कदेवचरिते 1-11